रोल नं ....................

# 929

## [ 323 ]

# कक्षा 9वीं वार्षिक परीक्षा, 2022-23

## संस्कृत

## SANSKRIT

(माध्यम हिन्दी)

( कुल प्रश्नों की संख्या : 23)
(समय : 03 घंटे)

( कुल मुद्रित पृष्ठों की संख्या : 08)
(पूर्णांक : 75)

---

निर्देश -

1. सर्वे प्रश्नः अनिवार्यः सन्ति।
2. प्रश्नानां सम्मुखे निर्धारिता: अडका प्रदता:।
3. प्रश्नानां उतराणि संस्कृत भाषायां देयानि ।

प्रश्न (1) उचित विकल्प चित्वा लिखत– (1x7=7)

(i) 'गुणवान' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(क) मतुप् (ख) क्तवतु (ग) तत्यत् (घ) शानच्

(ii) 'पठन्' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(क) क्त (ख) शतृ (ग) स्त्री (घ) तद्धित

(iii) 'बाल+टाप्' इत्यस्य पदं भविष्यति–

(क) बालटा (ख)बालाय् (ग)बालटाप् (घ) बाला

(iv) "दानवीरः जीमूतवाहनः राजकुमारः" इत्यस्मिन् विशेष्यपदम् अस्ति–

(क) दानवीरः (ख) जीमूतवाहनः (ग) राजकुमारः (घ) कोऽपि नास्ति

(v) 'श्वेतः अश्वः धावति' इत्यस्मिन् वाक्ये विशेष्यपदम् अस्ति–

(क) श्वेतः (ख) अश्वः (ग) धावति (घ) कोऽपि नास्ति

(vi) 'ग्रामे निर्धनः ब्राह्मणः वसति' इत्यस्मिन् वाक्ये विशेषणपदम् अस्ति–

(क) ग्रामे (ख) निर्धनः (ग) ब्राह्मणः (घ) वसति

(vii) 'कुटिलः जनः विश्वसनीयः न भवन्ति' इत्यस्मिन् वाक्ये विशेषणपदम अस्ति–

(क) कुटिलः (ख) जनः (ग) न (घ) भवन्ति

प्रश्न (2) एकपदेन उत्तरं संस्कृत भाषायां लिखत– (1x7=7)

(i) आयतलोचना का अस्ति?

(ii) तुला कीदृशी आसीत?

(iii) कुत्र दरिद्रता न भवेत्?

(iv) 'नीरसः' इत्यस्य पदस्य विलोमपदं किम् अस्ति?

(v) 'सरस्वती' इत्यस्य पदस्य पर्यायपदं लिखत?

(vi) 'पर्वतः' इत्यस्य पदस्य पर्यायपदं लिखत?

(vii) 'समीपम्' इत्यस्य पदस्य विलोमपदं किम?

प्रश्न (3) कोष्ठकेषु प्रदत्तशब्दैः रिक्त स्थानानि पूरयत (1x6=6)

(i) 'रामात्' पदे .......... विभक्तिः अस्ति। (पंचमी / सप्तमी)

(ii) 'राजन्' शब्दस्य तृतीया विभक्तेः शब्दरूपं ........... अस्ति। (राज्ञा / राजान्)

(iii) 'फलम्' पदे ............. विभक्तिः अस्ति। (प्रथमा / तृतीया)

(iv) 'अधिकारः' पदे ................ उपसर्गः अस्ति। (अधिक / अधि)

(v) 'वि' उपसर्गयुक्तपदं ............ अस्ति। (विहार / बिहार)

(vi) 'कृषकः ग्रामं गच्छति' अस्मिन् वाक्ये संज्ञापदं ............ अस्ति। (कृषकः / ग्रामं)

प्रश्न (4) शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षम् 'न' इति लिखत— (1x6=6)

(i) 'पठन्ति' इत्यस्मिन् पदे बहुवचनम् अस्ति।

(ii) 'वदामि' इत्यस्मिन् पदे प्रथमपुरुषः अस्ति।

(iii) 'अगच्छत्' इत्यस्मिन् पदे 'गम्' धातुः अस्ति।

(iv) 'सुतम्' अव्ययपदम् अस्ति।

(v) 'सर्वत्र' अव्ययपदम् न अस्ति।

(vi) 'त्वम् पत्र लिखसि' इत्यस्मिन् वाक्ये 'त्वम्' सर्वनामपदं न अस्ति।

प्रश्न (5) युग्म मेलनं कुरूत— (1x6=6)

| (अ) | (ब) |
|---|---|
| (i) मनः + हरः | अ) सज्जनः |
| (ii) चन्द्रशेखरः | ब) गुणसन्धि |
| (iii) रमेशः | स) सभापण्डितः |
| (iv) तत्पुरुषसमासः | द) बहुव्रीहिः |
| (v) व्यंजन सन्धि | इ) अव्ययीभावः |
| (vi) यथाशक्ति | फ) मनोहरः |

प्रश्न (6) जटायुः केन वामबाहुं दंशति? संस्कृते उत्तरं लिखत्— (2)

अथवा

कविः वाणीं किं कथयति? संस्कृते उत्तरं लिखत।

प्रश्न (7) अन्ते तपोदत्तः विद्याग्रहणाय कुत्र गतः? (2)

अथवा

कालः कस्य रसं पिवति?

प्रश्न (8) जीर्णधनः गिरिगुहाद्वारं कया आच्छाद्य गृहमागतः? (2)

अथवा

जीमूतवाहनः कल्पतरुम् उपगम्य किम् उवाच?

प्रश्न (9) बालः कदा क्रीडितुम् अगच्छत्? (2)

अथवा

यत्नेन किं रक्षेत् वित्तं वृत्तं वा?

प्रश्न (10) तपोदत्तः केन प्रकोरण विद्यामवाप्तुं प्रवृत्तोऽभवत्? (2)

अथवा

बालिका किं दृष्ट्वा आश्चर्यचकिता जाता?

प्रश्न (11) जटायुः रावणं किं कथयति? (2)

अथवा

मल्लिकाचन्दनश्च मासपर्यन्तं धेनोः कथम् अकुरुताम्?

प्रश्न (12) व्यञ्जनवर्णे कति वर्गाः सन्ति? प्रत्येकवर्गे कति वर्णाः भवन्ति? (2)

अथवा

स्वरवर्णानां नामानि लिखत ?

प्रश्न (13) अधोलिखितानि वाक्यानि कः/का, कं/कां प्रति कथयति– (कोऽपि द्वे) (2)

(i) सिकताः जलप्रवाहे स्थास्यन्ति किम्।

(ii) तण्डुलान् मा भक्षय।

(iii) धन्यवाद मातुल! याम्यधुना।

प्रश्न (14) रेखांकितपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत (कोऽपि द्वे) (2)

(i) चटकः स्वकर्मणि व्यग्रः आसीत्।

(ii) तपोदत्तः अक्षरज्ञानं विनैव वैदुष्यमवाप्तुम् अभिलषति।

(iii) सूर्योदयात् पूर्वमेव बालिका तत्रोपस्थिता।

प्रश्न (15) अशुद्धकारकवाक्यानां शुद्धिः करणीयाः (कोऽपि द्वे) (2)

(i) सैनिकः अश्वेन पतति।

(ii) छात्राः क्रीडाक्षेत्र क्रीडन्ति।

(iii) श्रीरामं नमः।

प्रश्न (16) अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (3)

अथासौ श्रेष्ठिपुत्रः धनदेवः स्नानोपकरणमादाय प्रहृष्टमनाः तेन अभ्यागतेन सह प्रस्थितः। तथानुष्ठिते स वणिक् स्नात्वा तं शिशुं गिरिगुहायां प्रक्षिप्य तद्वारं वृहत् शिलया आच्छाद्य सत्वरं गृहमागतः। सः श्रेष्ठी पृष्टवान्–" भोः! अभ्यागत! कथ्यतां कुत्र मे शिशुः यः त्वया सह नदीं गतः"। इति। सः अवदत्–"तव पुत्रः नदीतटात् श्येनेन हृतः।

(i) श्रेष्ठिपुत्रः किम् आदाय अभ्यागतेन सह प्रस्थितः?

(ii) श्रेष्ठी किं पृष्टवान्?

(iii) शिशुं नदीतटात् केन हृतः।

अथवा

प्रतिनिवृत्तिकाले स्वर्णकाकेन कक्षाभ्यन्तरात् तिस्रः मंजूषाः तत्पुरः समुत्क्षिप्ताः। लोभाविष्टा सा बृहत्तमां मंजूषां गृहीतवती। गृहमागत्य सा हर्षिता यावत् मंजूषामुद्घाटयति तावत् तस्यां भीषणः कृष्णसर्पो विलोकितः। लुब्धया बालिकया लोभस्य फलं प्राप्तम्। तदनन्तरं सा लोभं परित्यजत्।

(i) लोभाविष्टा बालिका कीदृशीं मंजूषां नयति?

(ii) गृहमागत्य तया का समुद्घाटिता?

(iii) का लोभं पर्यत्यजत्?

प्रश्न (17) अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (3)

जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।

वामबाहून्दश तदा व्यपाहरदरिन्दमः।।

(i) अरिन्दमः खगाधिपः कति बाहून् व्यपाहरत्?

(ii) जटायुः केन वामबाहुं दंशति?

(iii) अरिन्दमः कः आसीत्?

अथवा

पिबन्ति नद्यः स्वयमेव नाम्भः

स्वयं न खादन्ति फलानि वृक्षाः

नादन्ति सस्यं खलु वारिवाहाः

परोपकाराय सतां विभूतयः।

(i) काः स्वयम् अम्भः न पिबन्ति?

(ii) वृक्षाः स्वयं कानि न खादन्ति?

(iii) केषां विभूतयः परोपकाराय एवं भवन्ति?

प्रश्न (18) अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (3)

पुरुषः :– भोस्तपस्विन्! कथं मांम् अवरोधं करोषि। प्रयत्नेन किं न सिद्धं भवति? कावश्यकता शिलानाम्? सिकताभिरेव सेतुं करिष्यामि स्वसंकल्पदृढ़तया।

तपोदत्त :–आश्चर्यम् किम् सिकताभिरेव सेतुं करिष्यसि? सिकता जलप्रवाहे स्थास्यन्ति किम्? भवता चिन्तितं न वा?

पुरुषः :– (सोत्प्रासम्) चिन्तितं चिन्तितम्। सम्यक् चिन्तितम्। नाहं सोपानसहायतया अधिरोढुं विश्वसिमि। समुत्प्लुत्यैव गन्तुं क्षमोऽस्मि।

(i) का जलप्रवाहे न स्थास्यन्ति ?

(ii) पुरुषः काभिः सेतुनिर्माण कर्तुं प्रयतते?

(iii) कः सोपानसहायतया न अधिरोढुं विश्वसिति?

अथवा

उमा :– मातुल! पितामहः कथयति मासानन्तरम् अस्मत् गृहे महोत्सवः भविष्यति। तत्र त्रिशंत–सेटकमितं दुग्धम् अपेक्षते। एषा व्यवस्था भवद्भिः करणीया।

चन्दनः :–(प्रसन्नमनसा) त्रिंशत–सेटकपरिमितं दुग्धम्। शोभनम्। दुग्धव्यवस्था भविष्यति एवं इति पितामहं प्रति त्वया वक्तव्यम्।

उमा :– धन्यवाद् मातुल! याम्यधुना।

(i) मासानन्तर उमायाः पितामहस्य गृहे किं भविष्यति?

(ii) तत्र कियत् दुग्धम् अपेक्षते?

(iii) का चन्दनं धन्यवाद दत्ता?

प्रश्न (19) प्रदत्तशब्दैः रिक्तस्थानानि पूरयत–(कोऽपि द्वे) (3)

( जीमूतवाहनस्य, समर्थकः, गृहस्य, गुरुकुलमेव)

(क) तस्य ............. उद्याने कल्पतरुः आसीत्।

(ख) चन्दनः नारीस्वतन्त्रतायाः ............. आसीत।

(ग) ............... सर्वत्र यशः प्रथितम्।

(घ) विद्याध्ययनाय ............. गच्छमि।

प्रश्न (20) प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितश्लोकद्वयं लिखत– (4)

प्रश्न (21) स्वस्य प्राचार्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृते लिखत। (4)

अथवा

स्वामित्रस्य कृते आमन्त्रणपत्रं संस्कृत भाषायां लिखत।

प्रश्न. (22)अधोलिखितं अपठितगद्यांशं सम्यक् पठित्वा तदाधरितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत–(कोऽपि चत्वारः) (4)

संसारे अनेकेषां दुःखानां मूलकारणम् अज्ञानम्। अज्ञानात् एवं समाजे नानविकाराणां जन्म भवति। हिंसाभ्रष्टाचारादयः ये उपद्रवाः अस्मान् पीडयन्ति तेषां मूले अशिक्षा एवं वर्तते। वयं शिक्षायाः प्रकाशेन अज्ञानस्य अन्धकारं हर्तुं सज्जाः भवेम।

(i) संसारे दुःखानां मूलकारणं किम्?

(ii) समाजे अनेके विकाराः कथं जायन्ते?

(iii) के उपद्रवाः अस्मान् पीडयन्ति?

(iv) वयं केन अज्ञानस्य अन्धकारं हर्तुं सज्जाः भवेम?

(v) अस्य गद्यांशस्य शीर्षकं लिखत?

प्रश्न (23) अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत– (4)

(i) परोपकारः

(ii) छात्रजीवनम्

(iii) पर्यावरणम्

(iv) संस्कृतभाषायाः महत्वम्